# संस्कृतवार्ता:

दिनाङ्क:- 18.05.2025 प्रात: - 06:55

<u>किरेन रिजिजू:</u>

संसदीय: कार्यमन्त्री किरेन रिजिजू: समुदघोषितवान् यत् ऑपरेशन सिंदूर इति सैन्याभियानान्तर्गतं सप्त सर्वदलीय-प्रतिनिधिदलानि शीघ्रमेव विभिन्यै: देशै: वार्तां करिष्यन्ति, यत् आतंकवादं विरूध्य भारतस्य सामूहिकं संकल्पं प्रदर्शयति। संचार-तन्त्र-पटले श्री रिजिजू: संयुक्त-दलानां प्रतिनिधित्व-कर्तृणां सांसदानां प्रतिनिधिमण्डलानां च सूचीं प्रकाशितवान्।

---------------------------------

<u>अमित शाह:</u>

अमितशाह: ऑपरेशन सिंदूर इति पाकिस्तानं विरूध्य भारतीय-सैन्याभियानं भारतीय-सुरक्षा-नीतौ महत्वपूर्णं पदक्षेपं ख्यापितवान्। गुजरातस्य गान्धिनगरे जनसभामेकां सम्बोधयन् श्री शाह: प्रतिपादितवान् यत. ऑपरेशन सिंदूर इति सैन्याभियानं राष्ट्रिय-सुरक्षा प्रतिक्रियायां एकं ऐतिहासिकं परिवर्तनं वर्तते।

---------------------------------

<u>बांग्लादेश-विदेश-व्यापार:</u>

विदेश-व्यापार-महानिदेशालयेन बांग्लादेशात् भारते आयातितानां केषिञ्चद् वस्तूनाम् आयाते नव-जलपोत-प्रतिबन्धानां समुद्घोषणा कृता। शासनस्य अधिसूचनानुसारेण केन्द्रीय-वाणिज्योद्योगमन्त्रालयेन स्पष्टीकृतं यत् एते प्रतिबन्धा: बांग्लादेशनस्य तद् वस्तुषु न प्रवर्तयिष्यन्ते, यानि वस्तूनि भारतात् नेपाल-भूटानयो: निस्सार्यन्ते। अधिसूचनामाध्ययेन प्रसारिता: निर्देशा: तत्काल प्रभावेण प्रभाविभूता:। अधिसूचनायां वस्तूनां सूची एका अपि

प्रसारिता, यत्र प्रतिबन्धाः प्रर्वतन्ते, प्रतिबन्धित-वस्तूनि न आयातितानि स्युरिति स्पष्टीकृतम् ।

---------------------------------

भारतर्तुविज्ञानविभागेन

भारतर्तुविज्ञानविभागेन पूर्वोत्तरभारते आगामिषु पंचषट्दिवसेषु झंझावात-वायु-विद्युद्द्योतनेन सह अतिवृष्टेः पूर्वानुमानं कृतम् । असम-मेघालय-दक्षिणी कर्नाटकक्षेत्रेषु अद्य अतिवृष्टेः संभावना भारतीयऋतुविज्ञानविभागेन प्रकटिता।

---------------------------------

संस्कृत-साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः रविवासरे मध्याह्ने सार्धैक-वादनतःभविष्यति। कृपया श्रृण्वन्तु।

---------------------------------

आईपीएल

इण्डियन-प्रीमियर-लीग् इत्येतस्यां क्रिकेट-लीग-प्रतिस्पर्धायां 'कोलकाता-नाइटराइडर्स'- 'रॉयल चैलैन्जर्स-बैंग्लोर' इत्येतयोः दलयोः मध्ये समायोजितं द्वन्द्वं वर्षाकारणेन बाधितं, स्थगितञ्च, एतेन सह कोलकाता-नाइट-राइडर्स इति दलं प्रतिस्पर्धातः बहिभूतम। प्रतिस्पर्धायाम् अद्य सार्धत्रिवादने जयपुरस्थे सवाई-मानसिंह-क्रीडांगणे राजस्थान रॉयल्स इति दलं पंजाबकिंग्स इति दलं विरूध्य क्रीडिष्यते। अपरे द्वन्द्वे सायं सप्तवादने दिल्ली कैपिटल्स-गुजरात टाइटंस इत्येतयोः दलयोः मध्ये दिल्लीस्थे अरूण-जेटली-क्रीडागणे द्वन्द्वं स्यात्।

।। इति वार्ताः।।